## अनचि च। (४७/४८)

अचः इति [1]वर्तते, यरः इति च। [2]अनच्परस्य अच उत्तरस्य यरो द्वे वा भवतः[3]। दद्ध्यत्र। मद्ध्वत्र। अचः इत्येव, स्मितम्। [4]ध्मातम्।

[९५६] यणो मयो द्वे[5] भवत इति वक्तव्यम्। (म.भा. ३.४६४)

केचिदत्र यणः इति पञ्चमी, मयः इति षष्ठी इति व्याचक्षते। तेषाम् उल्क्का, वल्म्मीकः इत्युदाहरणम्। अपरे तु मयः इति पञ्चमी, यणः इति षष्ठी इति। तेषाम् दध्य्यत्र, मध्व्वत्र इत्युदाहरणम्।

[९५७] शरः खयो द्वे भवत इति वक्तव्यम्। (म.भा. ३.४६४)

अत्रापि यदि शरः इति पञ्चमी, खयः इति षष्ठी, तदा स्त्थाली, स्त्थाता इति उदाहरणम्। अथवा [6]खय उत्तरस्य शरो द्वे भवतः। वत्स्सः। इक्ष्षुः। क्ष्षीरम्। अप्स्सराः[7]।

[९५८] अवसाने [8]च यरो द्वे भवत इति वक्तव्यम्। (म.भा. ३.४६४)

वाक्क्, वाक्। त्वक्क्, त्वक्। [9]षट्ट्, षट्। तत्त्, तत्॥

## नादिन्याक्रोशे पुत्रस्य। (४८/५८)

आदिनि परतः आक्रोशे गम्यमाने पुत्रशब्दस्य न द्वे भवतः। '[10]अनचि च' (८.४.४७/४८) इति [11]प्राप्तिः प्रतिषिध्यते। पुत्रादिनी[12]त्वमसि पापे। [13]आक्रोशे इति किम्? तत्त्वकथने [14]द्विर्वचनं भवत्येव, पुत्रानत्ति इति पुत्त्रादिनी। शिशुमारी [15]व्याघ्री।

[९५९] तत्परे चेति वक्तव्यम्। (म.भा. ३.४६४)

पुत्रपुत्रादिनी त्वमसि पापे।

[९६०] वा हतजग्धपर इति वक्तव्यम्। (म.भा. ३.४६४)

पुत्त्रहती, पुत्रहती। पुत्त्रजग्धी, पुत्रजग्धी।

[९६१] चयो द्वितीयाः शरि पौष्करसादेः। (म.भा. ३.४६५)

चयो द्वितीया भवन्ति शरि परतः पौष्करसादेराचार्यस्य मतेन। तकारस्य थकारः – वथ्सः। ककारस्य खकारः – ख्षीरम्। पकारस्य फकारः – अफ्सराः॥

---

1. अनुवर्तते क. 2. अनच्परस्य नास्ति क.ह.ड. 3. अनचि परतः इत्यधिकम् क.ह.ड. 4. स्नातम् ब. 5. वाच्ये इ.ड. 6. शरः इति षष्ठी खयः इति पञ्चमी ब.ड.ह. 7. इत्युदारणम् इत्यधिकम् ब.क. 8. वा इ.ड. 9. षट्ट् नास्ति क.ड. 10. वाक्यमिदं नास्ति ब. 11. प्राप्तः इ.ह. 12. त्वम् नास्ति इ. 13. पुत्रादिन्याः इत्यधिकम् क. 14. मा भूत् इत्यधिकम् इ.ह. 15. व्याघ्री नास्ति ड.इ.